QN6EXH

प्रथमः पाठः

सम्भाषणम्

यह एक सम्भाषण पाठ है जिसमें दो सम्वाद हैं। पहले सम्वाद में पीलाराम एक शिक्षक की भूमिका में हैं। इस पाठ में गोपाल,उमेश तथा पियासी छात्र–छात्रा की भूमिका में हैं। दूसरे सम्वाद में फ्लोरा और विद्यावती दो सहेलियाँ हैं।

1.

पीलारामः – भो छात्राः! अद्य किं पठितुम् इच्छा अस्ति ?

छात्राः समवेतः – श्रीमन् ! अद्य वयं विवेकानन्दविषये ज्ञातुम् इच्छामः।

पीलारामः – उत्तमम्! वयं विवेकानन्दस्य बाल्यकालविषये ज्ञास्यामः।

गोपालः – विवेकानन्दः बाल्यकाले कीदृशः आसीत् ? सः किं किं करोति स्म ?

पीलारामः – विवेकानन्दः बाल्यकाले साहसी आसीत्। तस्मै क्रीडा अतीव रोचते स्म।

गोपालः – सः कथं प्रसिद्धः जातः?

पीलारामः – सः जिज्ञासुः आसीत्। धर्मविषये तस्य जिज्ञासा कालक्रमेण बलवती जाता। भाषाध्ययनं तस्य ज्ञानवृद्धिम् अकरोत्। सः महान् वक्तारूपेणापि ख्यातिं प्राप्तवान्। :

पियासी – श्रीमन्! मम माता वदति स्म यत् बाल्यकाले विवेकान्दस्य नाम नरेन्द्रः आसीत्। किमिदं सत्यम् ?

पीलारामः – आम् सत्यम्। कालान्तरे सः विवेकानन्दनाम्ना विश्वविख्यातः अभवत्।

उमेशः – तस्य विषये अन्यः कोऽपि विशेषः?

पीलारामः – तस्य विचारः उत्तमः आसीत् यत् मानवसेवा एव ईश्वरसेवा अस्ति। तस्य प्रभावेण जनाः संघटिताः भवन्ति स्म। सः देशे विदेशे च भारतीयसंस्कृतिम् उपदिशति स्म।

पियासी – महोदय! रायपुरनगरस्य विमानपत्तनं कथं विवेकानन्दनाम्ना प्रख्यातम् ?

पीलारामः – किशोरावस्थायां विवेकानन्दः रायपुरनगरे कालं व्यतीतवान्। श्रूयते यत् सः शकटेन नागपुरतः रायपुरम् आगच्छत्। अत्र सः संगीतशिक्षाम् अगृह्णात्। तस्य स्मरणार्थमेव विमानपत्तनस्य नाम विवेकानन्द इति दत्तम्।

उमेशः – श्रीमन्! पाककलायां च विवेकानन्दस्य रुचिः आसीत्। इदमपि तथ्यम्।

पीलारामः – आम्।

2.

फ्लोरा – विद्यावति! विद्यावति!

विद्यावती – आम्।

फ्लोरा – अत्रागच्छतु। भवती किं करोति ?

विद्यावती – इदानीम् अहं स्नानं करोमि।

फ्लोरा – भवती शीघ्रं स्नात्वा आगच्छतु।

विद्यावती – किमर्थं शीघ्रम् ?

फ्लोरा – गृहे शाकं नास्ति। भवती आपणं गत्वा शाकम् आनयतु।

विद्यावती – फ्लोरे! अहं वस्त्रं धृत्वा गच्छामि।

फ्लोरा – शीघ्रं द्विचक्रिकया गच्छतु।

विद्यावती – द्विचक्रिका सम्यक् नास्ति।

फ्लोरा – किं घटितम् ?

विद्यावती – इयं भग्ना जाता। अहं धावित्वा गच्छामि।

फ्लोरा – धावित्वा मा गच्छतु। आपणे यातायातं सघनं भवति। त्वया सर्तकतापेक्षिता। शृणोतु ! सूरणस्य मूल्यम् अपि ज्ञातव्यम्।

विद्यावती – अस्तु। यावत् अहम् आगच्छामि तावत् भवती कक्षं प्रक्षालयतु।

फ्लोरा – आम्। अहं कक्षसज्जां करोमि।

शब्दार्थाः

ख्यातिम्	–	प्रसिद्धि	कालान्तरे	–	बाद में
संघटिताः	–	संगठित	विमानपत्तनस्य	–	हवाई अड्डे का
व्यतीतवान्	–	बिताया	श्रूयते	–	सुना जाता है
शकटेन	–	बैलगाड़ी से	दत्तम्	–	दिया गया
आपणम्	–	मंडी, दुकान	द्विचक्रिकया	–	साइकिल से
भग्ना	–	टूटी हुई	सूरणस्य	–	जिमिकंद का
यावत्	–	जब तक	तावत्	–	तब तक

अभ्यासः

1. रिक्तस्थानानि पूरयत –

(क) भो छात्राः .... किम् इच्छति ?

श्रीमन्! अद्य वयं .... विषये ज्ञातुम् इच्छामः।

विवेकानन्दः .... साहसी आसीत्।

तस्य बाल्यनाम .... आसीत्।

(ख) भवती किं ....।

.... शीघ्रं स्नात्वा आगच्छतु।

गृहे .... नास्ति।

.... भग्ना जाता।

2. सन्धिविच्छेदं कुरुत –

अतीव –

वक्तारूपेणापि –

अत्रागच्छतु –

नास्ति –

सर्तकतापेक्षिता –

3. उदाहरणमनुसृत्य निम्नलिखितेषु क्रियापदेषु 'तुमुन्' प्रत्ययं योजयित्वा पदनिर्माणं कुरुत –

यथा–	पठ्	+	तुमुन्	=	पठितुम्
	गम्	+	तुमुन्	=	....
	दृश्	+	तुमुन्	=	....
	दा	+	तुमुन्	=	....
	कृ	+	तुमुन्	=	....

4. पाठे प्रयुक्तान् अव्ययपदान् चिनुत –

यथा – अत्र

....

....

....

....

QNFAZ5

5. स्वसहपाठिनां नामानि संस्कृते लिखत –

यथा – गोपालः, पियासी, उमेशः

6. तव क्षेत्रे गृहे वा कानि कानि शाकानि उपलब्धानि ?

7. द्विचक्रिकायाः विषये मातृभाषया पञ्चवाक्यानि लिखत।